भारत-स्वातन्त्र्य-स्वर्णजयन्ती-ग्रन्थमाला-४२

काश्मीरिकमहाकवि-भूमभट्टविरचितम्

# अर्जुनरावणीयम्

## ( रावणार्जुनीयम् )

समीक्षात्मक-मूलपाठ-संस्करणम्

सम्पादकः
विजयपालशास्त्री शिवचन्दसूनुः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

भारत-स्वातन्त्र्य-स्वर्णजयन्ती-ग्रन्थमाला-४२

काश्मीरिकमहाकवि-भूमभट्टविरचितम्

# अर्जुनरावणीयम्

## ( रावणार्जुनीयम् )

पाणिनीय-व्याकरणोदाहरण-समापनीयं महाकाव्यम्

समीक्षात्मक-मूलपाठ-संस्करणम्

उदीच्य-दाक्षिणात्य-मातृकाणामाश्रयेण सम्पादितं
सूत्रोदाहरण-निवेशभूषितञ्च

सम्पादकः
विजयपालशास्त्री शिवचन्दसूनुः

राष्ट्रियसंस्कृतसंस्थानम्
नवदेहली

# आमुखम्

दुरूहमपि शास्त्रं रुचिरया शैल्या अवबोधयितुं, बुद्धानपि विषयान् छात्रचित्ते स्थिरीकारयितुं, स्मरणजटिलानपि विषयान् स्मरणसुलभान् कर्तुं शिष्यवत्सलैः शास्त्रज्ञैर्मनीषिभिः समयानुसारम् अनेके उपायाश्चिन्तिता आसन्। श्रीमदमरसिंहेन नामलिङ्गानुशासनार्थं प्रणीतः अमरकोशः, केशवस्वामिना विरचितः नानार्थार्णवकोषः, सूक्तिव्याजेन पाणिनीयशास्त्रार्थविशदीकरणार्थं श्रीरामचन्द्रभट्टेन विरचितं सभ्याभरणम् इत्याद्यनेक-ग्रन्थजातानि तादृशप्रयासानां निदर्शनानि सन्ति। एवमेव पाणिनीयसूत्र-सिद्धान्तितार्थस्य उदाहरणभूतानि पदानि उपयुज्य सूत्रोदाहरणकाव्यरचना अपि प्राचीने काले समुदभूत्। भट्टिकाव्यमीदृशरचनायाः प्रसिद्धमुदाहरणं भवितुमर्हति। सम्प्रति भवत्करकमले विराजमानमिदम् अर्जुनरावणीयनामकं महाकाव्यं तत्कोटिकमेवास्ते। पाणिनीय-सूत्रोदाहरणप्रदर्शनपरमिदं काव्यं काश्मीरकविना भूमभट्टाख्येन रामायणान्तर्गत-कार्तवीर्यार्जुन-रावणयोर्युद्धप्रसङ्गात्मकं कथावस्तूपजीव्य आरचितमासीत्। सप्तविंशतिसर्गात्मके अस्मिन् बृहत्काये ग्रन्थे सार्धैकसहस्रादूर्ध्वं श्लोकसंख्या वर्तते। वीररसं प्राधान्येनाङ्गीकृत्य व्याकरणसूत्रोदाहरणभूतपदानि (यथासाध्यं) सूत्रक्रमेण संयोज्य कथाविस्तरं कृतवतः कवेरद्भुता शक्तिः काव्यमिदमवलोकयतां स्पष्टं भवेत्। अष्टाध्याय्याः संज्ञापरिभाषाभूयिष्टं प्रथमपादं, स्वरवैदिकसूत्राणि, अन्यानि च कतिचन एव सूत्राणि विहाय प्रायः सर्वेषामितरसूत्राणामुदाहरणानि इह काव्ये गुम्फितानि द्रष्टुं शक्यन्ते। प्रायः सर्वत्र सूत्रक्रमाविरोधेनैव सूत्रोदाहरणानि काव्येऽनुगतानीत्येदतदपरं वैशिष्ट्यम् एतस्य काव्यस्य।

बहुवैशिष्ट्यपूर्णम् अर्जुनरावणीयं सर्वप्रथमम् प्रकाशमानेतुं निर्णयसागरमुद्रणालयेन प्रयासो विहित आसीत्। परं तेन प्रयासेनापि काव्यमिदं अपूर्णतया एव प्रकाशितमभूत्। अपूर्णं खण्डितपाठमपि तत्संस्करणमवलोक्य काव्यगतवैशिष्ट्यम् अनुभूय काव्यस्य त्रुटिताद्यंशपरिपूर्तये यथामति यथासम्भवं अनुसन्धानं विधाय सप्तदशानां मातृकाणामाधारेण अर्जुनरावणीयस्य मूलपाठस्य समीक्षात्मकं संस्करणं राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे सम्प्रति प्रवाचकपदे कार्यरतेन विद्याव्यसनिना श्रीमता विजयपालशास्त्रिवर्येण सम्पादितम्।

तेनावलोकितासु सप्तदशसु मातृकासु पञ्च तावत् टीकायुता आसन्। परं तासु उपलब्धास्तिस्रष्टीकाः न स्वतन्त्रतया (पृथक्-पृथक्) काव्यस्यादितः आन्तं यावद् व्याख्यानपराः। तास्तु खण्डशः काव्यस्य विभिन्नभागानां विवरणात्मिकाः। किन्तु टीकात्रयस्य क्रमशः संयोजनेन काव्यस्य सप्तविंशतेः सर्गाणामपि व्याख्या समासादिता अभवत्। शिवदेशिकशिष्यकृता, अज्ञातकर्तृका, वासुदेवीया चेति व्यवहृताः ताः टीकाः केरलीयमातृकानामाधारेण लब्धा इत्यतः सम्पादकेन तास्तिस्रः सम्भूय कैरलीटीका

ओम्

# विषय-सूचिः


| विषयः | पृष्ठाङ्कः |
|---|---|
| आमुखम् | iii |
| भूमिका | ix-xvii |
| अर्जुनरावणीयस्य सर्ग-विभाजनं श्लोक-संख्या च | xxviii |
| सङ्केताक्षरविवरणम् | xxix |
| **गाङ्गटादिपादे (प्रथमाध्याय-द्वितीयपादे) प्रथमः सर्गः-** नायकस्य कृतवीर्यसूनोरर्जुनस्य गुणानां वर्णनम्। ततश्च तस्मिन् भूमिं शासति शरदागमन-प्रस्तावेन शरदृतु-वर्णनम्। | 1-10 |
| **भूवादिपादे (प्रथमाध्याय-तृतीयपादे) द्वितीयः सर्गः-** अर्जुनस्य शरदृतु-शोभावलोकनार्थं राजधानीतो नर्मदां प्रति प्रस्थानोपक्रमः। राजमार्गे पुरसुन्दरीणामौत्सुक्येन राजदर्शनार्थमागमनम्। नारीणां मिथोऽर्जुनस्य गुणानां सङ्कथा। | 11-25 |
| **आकडारादिपादे (प्रथमाध्याय-चतुर्थपादे) तृतीयः सर्गः-** सेनया सह माहिष्मत्या निर्गतस्य राज्ञः कार्त्तवीर्यस्य वने मृगया-विहारः। | 26-36 |
| **समर्थपादे (द्वितीयाध्याय-प्रथमपादे) चतुर्थः सर्गः-** राज्ञोऽन्तःपुरनारीभिः सह नर्मदाजल-विहारः। | 37-46 |
| **पूर्वापरपादे (द्वितीयाध्याय-द्वितीयपादे) पञ्चमः सर्गः-** सूर्यास्तमयवर्णनं सन्ध्यावर्णनञ्च। | 47-53 |
| **अनभिहितपादे (द्वितीयाध्याय-तृतीयपादे) षष्ठः सर्गः-** चन्द्रोदयवर्णनं विप्रलम्भवर्णनं रात्रिक्रीडावर्णनञ्च। | 54-69 |
| **द्विगुपादे (द्वितीयाध्याय-चतुर्थपादे) सप्तमः सर्गः-** प्रतिनायकस्य रावणस्य राजसभायां भुवं भ्रान्त्वा प्रत्यावृत्तेन चार-मण्डलेन कार्त्तवीर्यैश्वर्यस्य वर्णितम्। तच्छ्रुत्वा क्रुद्धस्य रावणस्यार्जुनविजयाय तद्राजधानीं माहिष्मतीं प्रति प्रस्थानम्। | 70-80 |
| **प्रत्ययपादपूर्वार्धे (तृतीयाध्याय-प्रथमपादे) अष्टमः सर्गः-** विमानगतस्य रावणस्य माहिष्मत्याः सौन्दर्यस्य समृद्धेश्चावलोकनम्। तादृशीं नगरीं दृष्ट्वा ईर्ष्याकषायितचित्तस्य कुपितस्य दशाननस्य युद्धाह्वानायार्जुनं प्रति शुकस्य दूतरूपेण प्रेषणम्। कार्त्तवीर्यो नगरीं | 81-92 |

24. वञ्चिलुञ्च्यृतश्च- वञ्चि- अवचित्वा, वञ्चित्वा। लुञ्चि- अलुचित्वा, लुञ्चित्वा।
ऋत्- ऋतित्वा, अर्तित्वा।

**वञ्चित्वा नवकीर्तिरम्बुराशीनवचित्वेव गृहेऽपि यस्य तस्थौ।**
**लुञ्चित्वा भुवि यो यशांसि राज्ञामलुचित्वैव धनान्यभूत् कृतार्थः ॥23॥**

**अर्तित्वाजिं भुजद्वितीयः पर्यन्तं द्विषतां महानृतित्वा।**
**कीर्त्या सितया बभौ परीतश्चन्द्रश्चन्द्रिकयेव यस्समन्तात् ॥24॥**

25. तृषिमृषिकृशेः काश्यपस्य- तृषि- तृषित्वा, तर्षित्वा। मृषि- अमृषित्वा, मर्षित्वा।
कृशि- अकृशित्वा, कर्शित्वा।

**तर्षित्वा याचकवर्गमभ्युपेतं**
**यो वर्षन्मेघ इवाकृतास्ततृष्णम्।**
**यस्येन्द्रस्सोमपिपासया तृषित्वा**
**यज्ञेषु प्रत्यहमापतत् सदेवः ॥25॥**

**मर्षित्वा सागसां प्रणत्या यश्चक्रे द्विषतां परां विभूतिम्।**
**युद्धाय पुनस्समागतानाममृषित्वा विशिखैश्चिराय नाशम् ॥26॥**

**नेशुस्सभुवस्सबन्धुभृत्याः कर्शित्वा भयचिन्तया द्विषन्तः।**
**सुहृदः पुनरस्य भीमशक्तेरकृशित्वा समुदः पुरेषु तस्थुः ॥27॥**

26. रलो व्युपधाद्धलादेः संश्च- अद्युतित्वा, द्योतित्वा। दिद्युतिषाम्, दिद्योतिषया।

**द्योतित्वा शात्रवाः परस्मिन् दृष्ट्वा यं युधि नेशुरद्युतित्वा।**
**दिद्योतिषयात्मनश्च हीना दिद्युतिषामवलोक्य यस्य काये ॥28॥**

(अष्टाविंशत्या कुलकम्)

---

23. अस्य पद्यस्योपरि न्यस्तः पाठो दाक्षिणात्यमातृकासु (ति 1.2.4) इत्येतास्वस्ति। उदीच्यपाठस्त्वेवं भिद्यते-

**वञ्चित्वा कीर्त्तिरम्वुधौ श्रीरवचित्वेव गृहेषु यस्य तस्थौ।**
**लुञ्चित्वा यो यशांसि राज्ञामलुचित्वा च धनान्यभूत्कृतार्थः ॥** ज. जो. पू 1-2.।

25. सदैव- ज. सदेवः- ति 4.। पुरः- ज. पुनः- ति 4.।
26. विशिखैर्निनाय- ज. विशिखैश्चिराय- ति 4.। 27. प्रणम्य- ति 4. पुरेषु- ज.।
28. शत्रवोऽपरस्मिन्- ज. शात्रवाः परस्मिन्- ति 4.। ०त्मनश्च हीनाः- ति 4. ०त्मनः सुदीनाः- ज.।
दिद्युतिषां समवलोक्य- ज. दिद्युतिषामवलोक्य- ति 4.।




**Rashtriya Sanskrit Sansthan**

56-57, Institutional Area, Janakpuri,
New Delhi - 110 058